[This question paper contains 4 printed pages]

| Roll No. | |
|---|---|

# ASME-24BC-SKT-II

# SANSKRIT (PAPER-II)

# संस्कृतम् (द्वितीयं प्रश्नपत्रम्)

Time Allowed : 3 Hours [Maximum Marks : 100
समयः होरात्रयम् (घंटा-त्रयम्) अधिकतमाः अङ्काः 100

## QUESTION PAPER SPECIFIC INSTRUCTIONS
## प्रश्नपत्र-सम्पृक्ताः विशेषनिर्देशाः

Please read each of the following instructions carefully before attempting questions.
कृपया प्रश्नोत्तरलेखनपूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः

1. **There are EIGHT questions divided in TWO Sections.**
   खण्डद्वयेषु विभाजिताः अष्टौ प्रश्नाः ।

2. **Candidate has to attempt FIVE questions in all.**
   परीक्षार्थिभिः पञ्चैव प्रश्नाः समाधेयाः ।

3. **Question Nos. 1 and 5 are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE question from each Section. The number of marks carried by a question/part is indicated against it.**
   प्रश्नसंख्या 1 तथा 5 अनिवार्ये। शेषप्रश्नेषु त्रयाणां समाधानं प्रदेयम्। तत्र प्रत्येकखण्डात् एकम् अवश्यं करणीयम्। प्रत्येकप्रश्नस्य तस्य भागस्य च अङ्काः तत्रैव निर्दिष्टाः।

4. **Question Nos. 1, 5 and 8 must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answer written in SANSKRIT must be in Devanagari script. Word limit in questions, wherever specified, should be adhered to.**
   प्रश्नसंख्या 1, 5 तथा 8 संस्कृतभाषयैव समाधेयाः । शेषप्रश्नानां समाधानं यथेच्छं संस्कृतभाषया अथवा प्रवेशपत्रे स्वीकृत-भाषया करणीयम् । संस्कृतभाषा देवनागरी-लिप्या एव लेखनीया । प्रश्नोत्तरस्य शब्दसीमा यदि क्वापि निर्धारिता तर्हि सा सीमा पालनीया।

5. **Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly. Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.**
   प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। यदि उत्तरपुस्तिकायां किमपि पृष्ठं रिक्तं (अलिखितं) स्यात् तर्हि तत्र स्पष्टरूपेण अनुलोम-विलोमरेखा (x) विधेया । अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भविष्यति।

6. **Re-evaluation/Re-checking of answer-book of the candidate is not allowed.**

   परीक्षार्थिनः उत्तरपुस्तिकायाः पुनर्मूल्याङ्कनस्य पुनर्निरीक्षणस्य वा अनुमतिर्नास्ति।

## खण्ड-A / Section-A

1. अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं प्रत्येकं सार्धशतेन(150) शब्दैः संस्कृतभाषयैव देवनागरीलिप्यामेव च विधीयताम् :- **4X5 = 20**

   (i) कादम्बरी रसज्ञानामाहारोऽपि न रोचते ।

   (ii) रघुवंशस्य महाकाव्यत्वं विविच्यताम् ।

   (iii) दशकुमारचरितस्य कथ्यं शिल्पञ्च सङ्क्षेपेण प्रतिपाद्यताम् ।

   (iv) माघेन विघ्नितोत्साहा नोत्सहन्ते पदक्रमे ।
   स्मरन्तो भारवेरेव कवयः कपयो यथा ।।-इति वचसःआशयःशिशुपालवधस्य परिप्रेक्ष्ये विविच्यताम् ।

2. अधोनिर्दिष्टानां विषयाणां सारगर्भितां समीक्षां कुरुत : –

   (a) कथं कौटिलीयार्थशास्त्रं भारतीयराजनीतिशास्त्रस्य ग्रन्थो मन्यते इति विविच्यताम् । **10**

   **Examine How the Kauṭilīyārthśāstra is the text of Indian Polity?**

   (b) सुन्दरकाण्डस्य सांस्कृतिकमाध्यात्मिकञ्च माहात्म्यं विशदयत । **10**

   **Discourse the cultural and spiritual significance of Sundarkāṇḍa**

3.अधस्तात् निर्दिष्टानां विषयाणां समीक्षा विधेया:-

   (a) आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्-इत्युक्तिं साम्प्रतिके परिप्रेक्ष्ये सयुक्तिकं विशदयत । **10**

   **Logically explain the statement- आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् in the light of modern perspective.**

   (b) मृच्छकटिकस्य वैशिष्ट्यम् उपादेयत्वञ्च निरूप्यताम् । **10**

   **Reveal the specialty and utility of Mṛcchakaṭikam.**

4. संस्कृतभाषयैव देवनागरीलिप्यामेव अधोलिखितयोः साम्प्रतिकमुपादेयत्वमाश्रित्य सङ्क्षिप्तटिप्पणी लिख्यताम्: -

   (a) गीतगोविन्दम् **10**

   (b) राजतरङ्गिणी **10**

**खण्ड-B / Section-B**

**5. संस्कृतभाषयैव देवनागरीलिप्यामेव च सार्धशतेन (150) शब्दैः सान्वयं व्याख्यायताम् :-**

**Explain with Anvaya to the following verses in 150 words by using Devanagari script in the Sanskrit language only.**

**(a)** क्षितिक्षमा पुष्करसंनिभेक्षणा या रक्षिता राघवलक्ष्मणाभ्याम् । **10**
सा राक्षसीभिर्विकृतेक्षणाभिः संरक्ष्यते सम्प्रति वृक्षमूले ॥

**(b)** **स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् ।** **10**
**कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः॥**

**6.** अधस्तनेषु पद्येषु कयोश्चिद् द्वयोः व्याकरणात्मकटिप्पणीसहितं हिन्दीभाषायाम् अथवा आङ्ग्लभाषायाम् अनुवादो विधीयताम्: - **2×10=20**

**Translate into Hindi or English any two of the following verses with grammatical remarks: -**

**(a)** आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भ आरम्भसदृशोदयः॥

**(b)** निवर्त्य सोऽनुव्रजतःकृतानतीनतीन्द्रियज्ञाननिधिर्नभः सदः।
समासदत्सादितदैत्यसम्पदःपदं महेन्द्रालयचारु चक्रिणः॥

**(c)** अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रःप्रणयन्नुपाधिभिः॥
चतुर्दशत्वं कृतवान्कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम् ॥

**7.** अधस्तनेषु पद्येषु कयोश्चिद् द्वयोः प्रसङ्गसन्दर्भनिर्देशपूर्वकं व्याख्या क्रियताम्:- **2×10=20**

**Explain with reference to the context any two of the following:**

**(a)** **अद्याप्यारूढमन्दरपरिवर्तावर्तभ्रान्तिजनितसंस्कारेव परिभ्रमति ।**
**कमलिनीसञ्चरणव्यतिकरलग्ननलिननालकण्टकेव न क्वचिदपि निर्भरमाबध्नाति पदम् ॥**

**(b)** अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभिर्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।
स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥

**(c)** आन्वीक्षकीत्रयीवार्तानां योगक्षेमसाधनो दण्डः । तस्य नीतिर्दण्डनीतिः । अलब्धलाभार्था लब्धपरिरक्षणी रक्षितविवर्धिनी वृद्धस्य तीर्थेषु प्रतिपादनी च ॥

**8-** अधोनिर्दिष्टानां व्याख्या नागराक्षरैः साहित्यिकसौन्दर्यं निर्दिश्य प्रसङ्गसन्दर्भान्वयनिर्देशपूर्वकं संस्कृतभाषायामेव विधेया:-

**Explain with Anvaya, reference to the context any of the following in Sanskrit by using Devanagari script:**

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः। **10**
परभृतविरुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशम् ॥
रम्यान्तरः कमलिनीहरितैः सरोभिश्छायाद्रुमैर्नियमितार्कमयूखतापः।
भूयात्कुशेशयरजोमृदुरेणुरस्याःशान्तानुकूलपवनश्च शिवश्च पन्थाः ॥

अथवा

इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥

**(b)** निवासश्चिन्तायाः परपरिभवो वैरमपरं। **10**
जुगुप्सा मित्राणां स्वजनजनविद्वेषकरणम्।
वनं गन्तुं बुद्धिर्भवति च कलत्रात्परिभवो।
हृदिस्थः शोकाग्निर्न च दहति सन्तापयति च ॥

अथवा

मम मदनमनङ्गं मन्मथं वर्द्धयन्ती
निशि च शयनके मम निद्रामाक्षिपन्ती।
प्रसरसि भयभीता प्रस्खलन्ती स्खलन्ती
मम वशमनुयाता रावणस्येव कुन्ती ॥

****